## (518) "चि भाषार्थः" (X-चुरादिः-1795. सक. सेट्.उभ.)

आस्वदीयः । [अ]

[1]चापकः-पिका, चिचापयिषकः-षिका, चापयिता-त्री, चिचापयिषिता-त्री ;
चापयन्-न्ती, चिचापयिषन्-न्ती, चापयिष्यन्-न्ती-ती ;
चिचापयिषिष्यन्-न्ती-ती, चापयमानः, चिचापयिषमाणः, चापयिष्यमाणः ;
चिचापयिषिष्यमाणः, [2]विचाप्-विचापौ-विचापः ; —
चापितम्-तः, चिचापयिषितः-तवान्, चापः, चिचापयिषुः, चापयितव्यम् ;
चिचापयिषितव्यम्, चापनीयम्, चिचापयिषणीयम् ; चाप्यम्,
चिचापयिष्यम्, ईषच्चापः-दुश्चापः-सुचापः ; —
चाप्यमानः, चिचापयिष्यमाणः ; चापः, चिचापयिषः ;
चापयितुम्, चिचापयिषितुम् ; चापना, चिचापयिषा ;
चापनम्, चिचापयिषणम् ; चापयित्वा, चिचापयिषित्वा ;
प्रचाप्य, प्रचिचापयिष्य ; चापम् २, चापयित्वा २, } चिचापयिषम् २ ; चिचापयिषित्वा २. }

## (519) "चिञ् चयने" ( V-स्वादिः-1251.सक. अनि. उभ. )

चायकः-यिका, [2]चापकः-पिका-चायका-यिका, चिकीषक[3]:-चिचीषकः-षिका,
चेचीयक[4]:-यिका ;

---

[अ] सिद्धान्तकौमुद्यां 'जि चि' इति चुरादौ भाषार्थकेषु पठितम् । तदनुसारेणात्र रूपाणि प्रदर्शितानि । माधवधातुवृत्तौ तु 'जुचि' इति पठित्वा 'जुञ्चयति-जुञ्चति' इति रूपद्वयं प्रदर्शितम् ।

1. 'चिस्फुरोर्णौ' (6-1-54) इत्यात्वे, 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुग् णौ' (7-3-36) इति पुगागमे रूपम् । एवं ण्यन्ते सर्वत्र ज्ञेयम् ।

2. 'चिस्फुरोर्णौ' (6-1-54) इत्यात्वं णौ वा भवति । आत्वपक्षे, 'अर्तिह्री—' (7-3-36) इत्यादिना पुगागमे 'णेरनिटि' (6-4-51) इति णिलोपे रूपम् । पुगभावपक्षे, वृद्धौ, आयादेशे च चायकः इति रूपम् । एवं ण्यन्ते सर्वत्र रूपद्वयं ज्ञेयम् ।

3. 'विभाषा चेः' (7-3-58) इति सनि अभ्यासात् परस्य कुत्वम् । कुत्वस्य वैकल्पिकत्वात् पक्षे चिचीषकः इति रूपम् । एवं सन्नन्ते सर्वत्र रूपद्वयं बोध्यम् ।

4. यङि परतः, 'अकृत्सार्वधातुकयोः—' (7-4-25) इति दीर्घः । एवं यङन्ते सर्वत्र ज्ञेयम् ।